## B.A. (HONOURS) SANSKRIT – I YEAR

## SEMESTER II

## CC4 – SELF MANAGEMENT IN THE GITA

## SECTION A – GITA: COGNITIVE AND EMOTIVE APPARATUS

ONE LONG ANSWER TYPE QUESTION – 1 X 10 = 10 MARKS

SHORT ANSWER TYPE QUESTIONS (IN SKT WITH DEVANAGARI) – 5 X 2 = 10 MARKS

### HIERARCHY OF INDRIYA, MANAS, BUDDHI AND ATMAN (III.42, XV.7)

श्री भगवानुवाच

**इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।**

**मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।3.42।।**

SHANKARA – **इन्द्रियाणि** श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं च अपेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्षया **पराणि** प्रकृष्टानि **आहुः** पण्डिताः। तथा **इन्द्रियेभ्यः परं मनः** संकल्पविकल्पात्मकम्। तथा **मनसः** तु **परा बुद्धिः** निश्चयात्मिका। तथा **यः**सर्वदृश्येभ्यः बुद्ध्यन्तेभ्यः आभ्यन्तरः यं देहिनम् इन्द्रियादिभिः आश्रयैः युक्तः कामः ज्ञानावरणद्वारेण मोहयति इत्युक्तम्। **बुद्धेः परतस्तु सः सः बुद्धेः** द्रष्टा परमात्मा।।ततः किम्

RAMANUJA – ज्ञानविरोधे प्रधानानि **इन्द्रियाणि आहुः** यत इन्द्रियेषु विषयव्यापृतेषु आत्मनि ज्ञानं न प्रवर्तते **इन्द्रियेभ्यः परं मनः** इन्द्रियेषु उपरतेषु अपि मनसि विषयप्रवणे आत्मज्ञानं न संभवति। **मनसः तु परा बुद्धिः** मनसि विषयान्तरविमुखे अपि विपरीताध्यवसायप्रवृत्तायां बुद्धौ न आत्मज्ञानं प्रवर्तते। सर्वेषु बुद्धिपर्यन्तेषु उपरतेषु अपि इच्छापर्यायः कामो रजःसमुद्भवो वर्तते चेत् स एव एतानि इन्द्रियादीनि अपि स्वविषयेषु वर्तयित्वा आत्मज्ञानं निरुणद्धि तदिदम् उच्यते **यो बुद्धेः परतः तु सः**इति बुद्धेः अपि यः परः स काम इत्यर्थः।

श्री भगवानुवाच

**ममैवांशो जीवलोके जीवभूतः सनातनः।**

**मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।।15.7।।**

SHANKARA – **ममैव** परमात्मनः नारायणस्य? **अंशः** भागः अवयवः एकदेशः इति अनर्थान्तरं **जीवलोके** जीवानां लोके संसारे **जीवभूतः** कर्ता भोक्ता इति प्रसिद्धः **सनातनः** चिरंतनः यथा जलसूर्यकः सूर्यांशः जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते च तेनैव आत्मना गच्छति? एवमेव यथा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते। अतः उपपन्नम् उक्तम् यद्गत्वा न निवर्तन्ते इति। ननु निरवयवस्य परमात्मनः कुतः अवयवः एकदेशः अंशः इति सावयवत्वे च विनाशप्रसङ्गः अवयवविभागात्। नैष दोषः? अविद्याकृतोपाधिपरिच्छिन्नः एकदेशः अंश इव कल्पितो यतः। दर्शितश्च अयमर्थः क्षेत्राध्याये विस्तरशः। स च जीवो मदंशत्वेन कल्पितः कथं संसरति उत्क्रामति च इति? उच्यते -- **मनःषष्ठानि इन्द्रियाणि** श्रोत्रादीनि **प्रकृतिस्थानि** स्वस्थाने कर्णशष्कुल्यादौ प्रकृतौ स्थितानि **कर्षति** आकर्षति।।कस्मिन् काले --,

RAMANUJA – इत्थम् उक्तस्वरूपः **सनातनो मम अंश एव** सन् कश्चिद् अनादिकर्मरूपाविद्यावेष्टनतिरोहितस्वरूपो **जीवभूतो जीवलोके** वर्तमानो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि **मनःषष्ठानि इन्द्रियाणि कर्षति।**कश्चित् च पूर्वोक्तमार्गेण अस्या अविद्याया मुक्तः स्वेन रूपेण अवतिष्ठते।जीवभूतः तु अतिसंकुचितज्ञानैश्वर्यः कर्मलब्धप्रकृतिपरिणामविशेषरूप शरीरस्थानाम् इन्द्रियाणां मनःषष्ठानाम् ईश्वरः तानि कर्मानुगुणम् इतः ततः कर्षति।

## ROLE OF ATMAN (XV.9)

श्री भगवानुवाच

**श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च।**

**अधिष्ठाय मनश्चायं विषयानुपसेवते।।15.9।।**

SHANKARA – **श्रोत्रं चक्षुः स्पर्शनं च** त्वगिन्द्रियं **रसनं घ्राणमेव च मनश्च** षष्ठं प्रत्येकम् इन्द्रियेण सह? **अधिष्ठाय** देहस्थः **विषयान्** शब्दादीन् **उपसेवते**।।एवं देहगतं देहात् -

RAMANUJA – एतानि मनःषष्ठानि इन्द्रियाणि **अधिष्ठाय** स्वस्वविषयवृत्त्यनुगुणानि कृत्वा तान् शब्दादीन् **विषयान् उपसेवते उपभुंक्ते।**

## MIND AS A PRODUCT OF PRAKRITI (VII.4)

श्री भगवानुवाच

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**

**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।7.4।।**

SHANKARA – **भूमिः** इति पृथिवीतन्मात्रमुच्यते न स्थूला भिन्ना प्रकृतिरष्टधा इति वचनात्। तथा अबादयोऽपि तन्मात्राण्येव उच्यन्ते **आपः अनलः वायुः खम्। मनः** इति मनसः कारणमहंकारो गृह्यते। **बुद्धिः** इति अहंकारकारणं महत्तत्त्वम्। **अहंकारः** इति अविद्यासंयुक्तमव्यक्तम्। यथा विषसंयुक्तमन्नं विषमित्युच्यते एवमहंकारवासनावत् अव्यक्तं मूलकारणमहंकार इत्युच्यते प्रवर्तकत्वात् अहंकारस्य। अहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके। **इतीयं** यथोक्ता **प्रकृतिः मे** मम ऐश्वरी मायाशक्तिः **अष्टधा भिन्ना** भेदमागता।।

RAMANUJA – अस्य विचित्रानन्दभोग्यभोगोपकरणभोगस्थानरूपेण अवस्थितस्य जगतः **प्रकृतिः इयं** गन्धादिगुणकपृथिव्यप्तेजोवाय्वाकाशादिरूपेण मनःप्रभृतीन्द्रियरूपेण च महदंकाररूपेण च **अष्टधा भिन्ना** मदीया इति विद्धि।

## PROPERTIES OF THREE GUNAS AND THEIR IMPACT ON THE MIND

**(XIII.5-6, XIV.5-8, 11-13, 17)**

श्री भगवानुवाच

**महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च।**

**इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः।।13.5।।**

SHANKARA – **महाभूतानि** महान्ति च तानि सर्वविकारव्यापकत्वात् भूतानि च सूक्ष्माणि। स्थूलानि तु इन्द्रियगोचरशब्देन अभिधायिष्यन्ते **अहंकारः** महाभूतकारणम् अहंप्रत्ययलक्षणः। अहंकारकारणं **बुद्धिः** अध्यवसायलक्षणा। तत्कारणम् **अव्यक्तमेव च**? न व्यक्तम् अव्यक्तम् अव्याकृतम् ईश्वरशक्तिः मम माया दुरत्यया (गीता 7।14) इत्युक्तम्। एवशब्दः प्रकृत्यवधारणार्थः एतावत्येव अष्टधा भिन्ना प्रकृतिः। चशब्दः भेदसमुच्चयार्थः। **इन्द्रियाणि दश**? श्रोत्रादीनि पञ्च बुद्ध्युत्पादकत्वात् बुद्धीन्द्रियाणि? वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात् कर्मेन्द्रियाणि तानि दश। **एकं च** किं तत् मनः एकादशं संकल्पाद्यात्मकम्। **पञ्च च इन्द्रियगोचराः** शब्दादयो विषयाः। तानि एतानि सांख्याः चतुर्विंशतितत्त्वानि आचक्षते।।

RAMANUJA – **महाभूतानि अहंकारो बुद्धिः अव्यक्तम् एव च** इति क्षेत्रारम्भकद्रव्याणि? पृथिव्यप्तेजोवाय्वाकाशमहाभूतानि? अहंकारो भूतादिः? बुद्धिः महान्? अव्यक्तं प्रकृतिः। **इन्द्रियाणि दश एकं च पञ्च च इन्द्रियगोचराः**? इति क्षेत्राश्रितानि तत्त्वानि? श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि

वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि? तानि दश? एकम् इति मनः। इन्द्रियगोचराः च पञ्च शब्दस्पर्शरूपरसगन्धाः।

**इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतनाधृतिः।**

**एतत्क्षेत्रं समासेन सविकारमुदाहृतम्।।13.6।।**

SHANKARA – **इच्छा?** यज्जातीयं सुखहेतुमर्थम्? उपलब्धवान् पूर्वम्? पुनः तज्जातीयमुपलभमानः तमादातुमिच्छति सुखहेतुरिति सा इयं इच्छा अन्तःकरणधर्मः ज्ञेयत्वात् क्षेत्रम्। तथा **द्वेषः?** यज्जातीयमर्थं दुःखहेतुत्वेन अनुभूतवान्? पुनः तज्जातीयमर्थमुपलभमानः तं द्वेष्टि सोऽयं द्वेषः ज्ञेयत्वात् क्षेत्रमेव। तथा **सुखम्** अनुकूलं प्रसन्नसत्त्वात्मकं ज्ञेयत्वात् क्षेत्रमेव। दुःखं प्रतिकूलात्मकम् ज्ञेयत्वात् तदपि क्षेत्रम्।**संघातः** देहेन्द्रियाणां संहतिः। तस्यामभिव्यक्तान्तःकरणवृत्तिः? तप्त इव लोहपिण्डे अग्निः आत्मचैतन्याभासरसविद्धा **चेतना** सा च क्षेत्रं ज्ञेयत्वात्। **धृतिः** यया अवसादप्राप्तानि देहेन्द्रियाणि ध्रियन्ते सा च ज्ञेयत्वात् क्षेत्रम्। सर्वान्तःकरणधर्मोपलक्षणार्थम् इच्छादिग्रहणम्। यत उक्तमुपसंहरति **एतत् क्षेत्रं समासेन सविकारं** सह विकारेण महदादिना **उदाहृतम्** उक्तम्।।

यस्य क्षेत्रभेदजातस्य संहतिः इदं शरीरं क्षेत्रम् इति उक्तम्? तत् क्षेत्रं व्याख्यातं महाभूतादिभेदभिन्नं धृत्यन्तम्। क्षेत्रज्ञः वक्ष्यमाणविशेषणः -- यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानात् अमृतत्वं भवति? तम् ज्ञेयं यत्तत्प्रवक्ष्यामि (गीता 13।12) इत्यादिना सविशेषणं स्वयमेव वक्ष्यति भगवान्। अधुना तु तज्ज्ञानसाधनगणममानित्वादिलक्षणम्? यस्मिन् सति तज्ज्ञेयविज्ञाने योग्यः अधिकृतः भवति? यत्परः संन्यासी ज्ञाननिष्ठः उच्यते? तम् अमानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् --,

RAMANUJA – **इच्छा द्वेषः सुखं दुःखम्** इति क्षेत्रकार्याणि क्षेत्रविकाराः उच्यन्ते यद्यपि इच्छाद्वेषसुखदुःखानि आत्मधर्मभूतानि? तथापि आत्मनः क्षेत्रसंबन्धप्रयुक्तानि इति क्षेत्रकार्यतया क्षेत्रविकारा उच्यन्ते। तेषां पुरुष धर्मत्वम्पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते (गीता 13।20) इति वक्ष्यते। **संघातः चेतनाधृतिः?** आधृतिः आधारः? सुखदुःखे भुञ्जानस्य भोगापवर्गौ साधयतः च चेतनस्य आधारतया उत्पन्नो भूतसंघातः? प्रकृत्यादिपृथिव्यन्तद्रव्यारब्धम् इन्द्रियाश्रयभूतम्? इच्छाद्वेषसुखदुःखविकारिभूतसंघातरूपं, चेतनसुखदुःखोपभोगाधारत्वप्रयोजनं क्षेत्रम् इति उक्तं भवति। **एतत् क्षेत्रं समासेन** संक्षेपेण **सविकारं** सकार्यम् **उदाहृतम्।अथ क्षेत्रकार्येषु आत्मज्ञानसाधनतया उपादेया गुणाः प्रोच्यन्ते** –

श्री भगवानुवाच

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः।**

**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।14.5।।**

SHANKARA – **सत्त्वं रजः तमः इति** एवंनामानः। **गुणाः** इति पारिभाषिकः शब्दः? न रूपादिवत् द्रव्याश्रिताः गुणाः। न च गुणगुणिनोः अन्यत्वमत्र विवक्षितम्। तस्मात् गुणा इव नित्यपरतन्त्राः क्षेत्रज्ञं प्रति अविद्यात्मकत्वात् क्षेत्रज्ञं निबध्नन्तीव। तम् आस्पदीकृत्य आत्मानं प्रतिलभन्ते इति निबध्नन्ति इति उच्यते। ते च **प्रकृतिसंभवाः**भगवन्मायासंभवाः **निबध्नन्ति** इव हे **महाबाहो?** महान्तौ समर्थतरौ आजानुप्रलम्बौ बाहू यस्य सः महाबाहुः? हे महाबाहो **देहे** शरीरे देहिनं देहवन्तम् **अव्ययम्?** अव्ययत्वं च उक्तम् अनादित्वात् (गीता 13.31) इत्यादिश्लोकेन। ननु देही न लिप्यते इत्युक्तम्। तत कथम् इह निबध्नन्ति इति अन्यथा उच्यते परिहृतम् अस्माभिः इवशब्देन निबध्नन्ति इव इति।।**तत्र** सत्त्वादीनां सत्त्वस्यैव तावत् लक्षणम् उच्यते --,

RAMANUJA – सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबन्धिनः स्वभावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायाम् अनुद्भूताः तद्विकारेषु महदादिषु उद्भूताः महदादिविशेषान्तैः आरब्धदेवमनुष्यादिदेहसंबन्धिनम् एनं **देहिनम् अव्ययं**स्वतो गुणसम्बन्धानर्हं **देहे** वर्तमानं निबध्नन्ति देहे,वर्तमानत्वोपाधिना निबध्नन्ति इत्यर्थः।सत्त्वरजस्तमसाम् आकारं बन्धनप्रकारं च आह –

**तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।**

**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।14.6।।**

SHANKARA – **निर्मलत्वात्** स्फटिकमणिरिव **प्रकाशकम् अनामयं** निरुपद्रवं **सत्त्वं**तन्निबध्नाति। कथम् **सुखसङ्गेन** सुखी अहम् इति विषयभूतस्य सुखस्य विषयिणि आत्मनि संश्लेषापादनं मृषैव सुखे सञ्जनम् इति। सैषा अविद्या। न हि विषयधर्मः विषयिणः भवति। इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्मः इति उक्तं भगवता। अतः अविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणया अस्वात्मभूते सुखे सञ्जयति इव? आसक्तमिव करोति? असङ्गं सक्तमिव करोति? असुखिनं सुखिनमिव। तथा **ज्ञानसङ्गेन च?** ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्य अन्तःकरणस्य धर्मः? न आत्मनः आत्मधर्मत्वे सङ्गानुपपत्तेः? बन्धानुपपत्तेश्च। सुखे इव ज्ञानादौ सङ्गः मन्तव्यः। हे **अनघ** अव्यसन।।

RAMANUJA – **तत्र** सत्त्वरजस्तमःसु सत्त्वस्य स्वरूपम् ईदृशं **निर्मलत्वात् प्रकाशकम्**प्रकाशसुखावरणस्वभावरहितता निर्मलत्वम् प्रकाशसुखजननैकान्तस्वभावतया प्रकाशसुखहेतुभूतम् इत्यर्थः। प्रकाशो वस्तुयाथात्म्यावबोधः **अनामयम्**आमयाख्यकार्यं न विद्यते? इति अनामयम् अरोगताहेतुः इत्यर्थः।एष सत्त्वाख्यगुणो देहिनम् एनं **सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति?** पुरुषस्य सुखसङ्गं ज्ञानसङ्गं च जनयति इत्यर्थः।ज्ञानसुखयोः सङ्गे हि जाते तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते? ततः च तत्फलानुभवसाधनभूतासु योनिषु जायते इति **सत्त्वं** सुखज्ञानसङ्गद्वारेण पुरुषं बध्नाति ज्ञानसुखजननं पुनः अपि तयोः सङ्गजननं च सत्त्वम् इति उक्तं भवति।

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।।14.7।।**

SHANKARA – **रजः रागात्मकं** रञ्जनात् रागः गैरिकादिवद्रागात्मकं **विद्धि** जानीहि। **तृष्णासङ्गसमुद्भवं** तृष्णा अप्राप्ताभिलाषः? आसङ्गः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः? तृष्णासङ्गयोः समुद्भवं तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति **तत्** रजः **निबध्नाति कौन्तेय कर्मसङ्गेन?** दृष्टादृष्टार्थेषु कर्मसु सञ्जनं तत्परता कर्मसङ्गः? तेन निबध्नाति रजः **देहिनम्**।।

RAMANUJA – **रजो रागात्मकं** रागहेतुभूतम्? रागो योषितपुरुषयोः अन्योन्यस्पृहा। **तृष्णासङ्गसमुद्भवं** तृष्णासङ्गयोः उद्भवस्थानं तृष्णासङ्गहेतुभूतम् इत्यर्थः। तृष्णा शब्दादिसर्वविषयस्पृहा। सङ्गः पुत्रमित्रादिषु संबन्धिषु संश्लेषस्पृहा। तथा **देहिनं**कर्मसु क्रियासु स्पृहाजननद्वारेण निबध्नाति क्रियासु हि स्पृहया याः क्रिया आरभते देही? ताः च पुण्यपापरूपा इति तत्फलानुभवसाधनभूतासु योनिषु जन्महेतवो भवन्ति? अतः कर्मसङ्गद्वारेण रजो देहिनं निबध्नाति। तद् एवं रजो रागतृष्णासङ्गहेतुः कर्मसङगहेतुः च इति उक्तं भवति।

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**

**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत।।14.8।।**

SHANKARA – ,**तमः** तृतीयः गुणः **अज्ञानजम्** अज्ञानात् जातम् अज्ञानजं **विद्धि मोहनं**मोहकरम् अविवेककरं **सर्वदेहिनां** सर्वेषां देहवताम्। **प्रमादालस्यनिद्राभिः** प्रमादश्च आलस्यं च निद्रा च प्रमादालस्यनिद्राः ताभिः प्रमादालस्यनिद्राभिः तत् तमः **निबध्नाति भारत**।।पुनः गुणानां व्यापारः संक्षेपतः उच्यते --,

RAMANUJA – ज्ञानाद् अन्यद् इह अज्ञानम् अभिप्रेतम् ज्ञानं वस्तुयाथात्म्यावबोधः? तस्माद् अन्यत् तद्विपर्ययज्ञानं **तमः तु** वस्तुयाथात्म्यविपरीतविषयज्ञानजं **मोहनं सर्वदेहिनाम्**मोहो विपर्ययज्ञानम्? विपर्ययज्ञानहेतुः इत्यर्थः। **तत्** तमः**प्रमादालस्यनिद्रा**हेतुतया तद्द्वारेण देहिनं **निबध्नाति।** प्रमादः कर्तव्यात् कर्मणः अन्यत्र प्रवृत्तिहेतुभूतम् अनवधानम्। आलस्यं कर्मसु अनारम्भस्वभावः? स्तब्धता इति यावत्। पुरुषस्य इन्द्रियप्रवर्तनश्रान्त्या सर्वेन्द्रियप्रवर्तनोपरतिः निद्रा तत्र बाह्येन्द्रियप्रवर्तनोपरमः स्वप्नः मनसः अपि उपरतिः सुषुप्तिः।सत्त्वादीनां बन्धद्वारभूतेषु प्रधानानि आह –

**सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते।**

**ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत।।14.11।।**

SHANKARA – **सर्वद्वारेषु?** आत्मनः उपलब्धिद्वाराणि श्रोत्रादीनि सर्वाणि करणानि? तेषु सर्वद्वारेषु अन्तःकरणस्य बुद्धेः वृत्तिः **प्रकाशः देहे अस्मिन् उपजायते।** तदेव **ज्ञानम्। यदा** एवं प्रकाशो ज्ञानाख्यः

उपजायते? **तदा** ज्ञानप्रकाशेन लिङ्गेन **विद्यात् विवृद्धम्** उद्भूतं **सत्त्वम् इति उत** अपि।।रजसः उद्भूतस्य इदं चिह्नम् --,

RAMANUJA – सर्वेषु चक्षुरादिषु ज्ञान**द्वारेषु यदा** वस्तुयाथात्म्यप्रकाशे **ज्ञानम् उपजायते?तदा अस्मिन् देहे सत्त्वं प्रवृद्धम् इति विद्यात्।**

**लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।**

**रजस्येतानि जायन्ते विवृद्धे भरतर्षभ।।14.12।।**

SHANKARA – **लोभः** परद्रव्यादित्सा? **प्रवृत्तिः** प्रवर्तनं सामान्यचेष्टा? **आरम्भः** कस्य **कर्मणाम्। अशमः** अनुपशमः? हर्षरागादिप्रवृत्तिः **स्पृहा** सर्वसामान्यवस्तुविषया तृष्णा -- **रजसि** गुणे **विवृद्धे एतानि** लिङ्गानि **जायन्ते** हे **भरतर्षभ**।।

RAMANUJA – **लोभः** स्वकीयद्रव्यस्य अत्यागशीलता। **प्रवृत्तिः** प्रयोजनम् अनुद्दिश्य अपि चलनस्वभावता। **आरम्भः**,कर्मणां **फलसाधनभूतानां कर्मणाम् आरम्भे उद्योगः।** अशमः **इन्द्रियानुपरतिः।** स्पृहा **विषयेच्छा।** एतानि रजसि प्रवृद्धे जायन्ते। **यदा लोभादयो वर्तन्ते? तदा रजः प्रवृद्धम् इति विद्याद् इत्यर्थः।**

**अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।**

**तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।।14.13।।**

SHANKARA – **अप्रकाशः** अविवेकः? अत्यन्तम् **अप्रवृत्तिश्च** प्रवृत्त्यभावः तत्कार्यं **प्रमादो मोह एव च** अविवेकः मूढता इत्यर्थः। **तमसि** गुणे **विवृद्धे एतानि** लिङ्गानि **जायन्ते** हे **कुरुनन्दन**।।मरणद्वारेणापि यत् फलं प्राप्यते? तदपि सङ्गरागहेतुकं सर्वं गौणमेव इति दर्शयन् आह --,

RAMANUJA – **अप्रकाशः** ज्ञानानुदयः। **अप्रवृत्तिः** च स्तब्धता। **प्रमादः**अकार्यप्रवृत्तिफलम् अनवधानम्। **मोहः** विपरीतज्ञानम्। एतानि तमसि प्रवृद्धे जायन्ते एतैः तमः प्रवृद्धम् इति विद्यात्।

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**

**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।14.17।।**

SHANKARA – **सत्त्वात्** लब्धात्मकात् **संजायते** समुत्पद्यते **ज्ञानम्? रजसो लोभ एव च? प्रमादमोहौ** च उभौ **तमसो भवतः? अज्ञानमेव च** भवति।।किं च

RAMANUJA – एवं परम्परया जाताद् अधिक**सत्त्वाद्** आत्मयाथात्म्यापरोक्षरूपं **ज्ञानं जायते। तथा प्रवृद्धाद् रजसः** स्वर्गादिफल**लोभः** जायते तथा प्रवृद्धात् च तमसः प्रमादः अनवधाननिमित्तासत्कर्मणि प्रवृत्तिः? ततः च मोहो विपरीतज्ञानम्? ततः च अधिकतरं तमः? ततः च **अज्ञानं** ज्ञानाभावः।